# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री-1 (SEM-2)** **प्रश्नपत्रम् – 4** गुणाः –70

विषयः – प्राचीनराजनीतिशास्त्रम् **कोड – G.E.-1.2.2** समयः - 11 तः 02 पर्यन्तम्

दिनाङ्कः –13/04/2019 सन्दर्भग्रन्थः – कौटिल्य अर्थशास्त्र (3-4 अधिकरणानि)

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 अधोलिखितेषु द्वयोः श्लोकयोः संस्कृते ससन्दर्भं व्याख्या कार्या।** **10**

(1) धर्मश्च व्यवहारश्च चरित्रं राजशासनम्।
विवादार्थश्चतुष्पादः पश्चिमः पूर्वबाधकः॥

(2) एतानुत्क्रम्य दायादान् वेदने जातकर्मणि।
जारस्त्रीदातृवेत्तारः सम्प्राप्ताः सङ्ग्रहान्ययम्॥

(3) सेतुभ्यो मुञ्चतस्तोयमवारे षट्पणो दमः।
वारे वा तोयमन्येषां प्रमादेनोपरुन्धतः॥

**प्रश्नः-2 एकस्य निबन्धात्मकमुत्तरं लिखत।** **10**

(1) विवाहपूर्वो व्यवहारः एवं विवाहधर्मः।

(2) पुत्रक्रमात् उत्तराधिकारविषये लिखत।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 कयोश्चिद् द्वयोः संस्कृते भावार्थं लिखत।** **10**

(1) अनाहिताग्निः शतगुरयज्वा च सहस्रगुः।
सुरापो वृषली भर्ता ब्रह्महा गुरुतल्पगः॥

(2) दाता प्रतिग्रहीता च स्यातां नोपहतौ यथा।
दाने क्रये वानुशयं तथा कुर्युः सभासदः॥

(3) प्रव्रज्यासु वृथाचारान् राजा दण्डेन वारयेत्।
धर्मो ह्यधर्मोपहतः शास्तारं हन्त्युपेक्षितः॥

**प्रश्नः-4 कस्याप्येकस्य सविस्तरमुत्तरं दीयताम।** **10**

(1) ‘साहसम्’ इति विषये सविस्तरं लिखत।

(2) ‘दण्डपारुष्यं’ यथाग्रन्थं वर्णयत।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 द्वयोः ससन्दर्भं व्याख्या कार्या ।** **10**

(1) प्रक्षेपं पण्यनिष्पत्तिं शुल्कं वृद्धिमवक्रयम् ।
व्ययानन्यांश्च संख्याय स्थापयेदर्थमर्थवित् ।।

(2) अरब्धारस्तु हिंसायां गूढाजीवास्त्रयोदशः ।
प्रावास्या निष्क्रयार्थं वा दद्युर्दोषविशेषतः ।।

(3) पुरुषं चापराघं च कारणं गुरुलाघवम् ।
अनुबन्धं तदात्वं च देशकालौ समीक्ष्य च ।।

**प्रश्नः-6 एकस्य सविस्तरमुत्तरं यच्छत।** **10**

(1) शुद्धदण्डः एवं चित्रदण्डः उभयोः विषये लिखत।

(2) अतिचारदण्डविषये सविस्तरं लिखन्तु ।

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-7 दशानां लघुत्तरेण लिखत ।** **10**

(1) कौटिल्यार्थशास्त्रस्य रचचिता कः?

(2) तृतीयाधिकरणस्य नाम किम्?

(3) विवाहस्य कति प्रकाराः?

(4) धर्मविवाहानन्तरं कस्य व्यवहारस्य प्रारम्भो भवति?

(5) को नाम गान्धर्वविवाहः?

(6) राक्षसविवाहस्य अपरं नाम किम्?

(7) कस्मिन् काले कन्या विवाहयोग्या भवति?

(8) को नाम सुतपुत्रः?

(9) चतुर्थाधिकरणस्य नाम किम्?

(10) किं नाम दण्डपारुष्यम्?

(11) चतुर्थाधिकरणस्य सप्तदशे अध्याये कस्य चर्चा कृता?

(12) वाक्पारुष्यस्य कति भेदाः?

(13) दैवयोगात् भूयमानानां महाविपत्तिनां कति नामानि?

(14) मेघः पूर्णे जाते केषां पुजा भवति?

(15) कौटिल्यार्थशास्त्रे कति अधिकरणानि?